# પ્રદોષ સ્તોત્રાષ્ટકમ

## Pradhosha Stotrashtakam

---

પ્રદોષસ્તોત્રાષ્ટકમ |

સત્યં બ્રવીમિ પરલોકહિતં બ્રવીમિ સારં બ્રવીમ્યુપનિષદ્ધૃદયં બ્રવીમિ |
સંસારમુલ્બણમસારમવાપ્ય જન્તોઃ સારોઽયમીશ્વરપદાંબુરુહસ્ય સેવા ||૧||

યે નાર્ચયન્તિ ગિરિશં સમયે પ્રદોષે યે નાર્ચિતં શિવમપિ પ્રણમન્તિ ચાન્યે |
એતત્કથાં શ્રુતિપુટૈર્ન પિબન્તિ મૂઢાસ્તે જન્મજન્મસુ ભવન્તિ નરા દરિદ્રાઃ ||૨||

યે વૈ પ્રદોષસમયે પરમેશ્વરસ્ય કુર્વન્ત્યનન્યમનસોંઽઘ્રિસરોજપૂજામ |
નિત્યં પ્રવૃદ્ધધનધાન્યકળત્રપુત્રસૌભાગ્યસંપદધિકાસ્ત ઇહૈવ લોકે ||૩||

કૈલાસશૈલભુવને ત્રિજગજ્જનિત્રીં ગૌરીં નિવેશ્ય કનકાચિતરત્નપીઠે |
નૃત્યં વિધાતુમભિવાઞ્છતિ શૂલપાણૌ દેવાઃ પ્રદોષસમયે નુ ભજન્તિ સર્વે ||૪||

વાગ્દેવી ધૃતવલ્લકી શતમુખો વેણું દધત્પદ્મજસ્તાલોન્નિદ્રકરો રમા ભગવતી ગેયપ્રયોગાન્વિતા |
વિષ્ણુઃ સાન્દ્રમૃદઙ્ગવાદનપટુર્દેવાઃ સમન્તાત્સ્થિતાઃ સેવન્તે તમનુ પ્રદોષસમયે દેવં મૃડાનીપતિમ ||૫||

ગન્ધર્વયક્ષપતગોરગસિદ્ધસાધ્યવિદ્યાધરામરવરાપ્સરસાં ગણાંશ્ચ |
યેઽન્યે ત્રિલોકનિલયાઃ સહભૂતવર્ગાઃ પ્રાપ્તે પ્રદોષસમયે હરપાર્શ્વસંસ્થાઃ ||૬||

અતઃ પ્રદોષે શિવ એક એવ પૂજ્યોઽથ નાન્યે હરિપદ્મજાદ્યાઃ |
તસ્મિન્મહેશે વિધિનેજ્યમાને સર્વે પ્રસીદન્તિ સુરાધિનાથાઃ ||૭||

એષ તે તનયઃ પૂર્વજન્મનિ બ્રાહ્મણોત્તમઃ |
પ્રતિગ્રહૈર્વયો નિન્યે ન દાનાદ્યૈઃ સુકર્મભિઃ ||૮||

અતો દારિદ્ર્યમાપન્નઃ પુત્રસ્તે દ્વિજભામિનિ |
દદ્દોષપરિહારાર્થં શરણં યાતુ શઙ્કરમ ||૯||

ઇતિ શ્રીસ્કાન્દોક્તં પ્રદોષસ્તોત્રાષ્ટકં સંપૂર્ણમ ||